दाहुः—न हु मद्दुमइस्स वहे । मज्के कमलाण नेव खीरोए ॥ ववसायसायरेस्सु । पुरिसाण लछी फु ृ वसइ ॥ १ ॥ परं केषांचिद्व्यवसायं विनापि नवंती, अपरेषां च व्यवसायेनापि न नवंती लक्ष्मीः स्वस्य कमप्यन्वयव्यतिरेकानुविधायिनमदृष्टमपरमेव हेतुमपेक्षते, स च धर्म एवेति तात्पर्यं. यतः—उन्नवंती विना यत्न–मनवंती च यत्नतः ॥ लक्ष्मीरेव समाख्याति । विशेषं पुण्यपापयोः ॥ १ ॥ एवं धर्ममूलत्वमर्थस्योपदर्श्य कामस्यापि तदाह—

॥ मूलम् ॥–एगस्स कामियसुहं । बहुसमाणेति नोगसंयोगे । इअरस्स न तारिसयं । को इह हेउ विणा धम्मो ॥ ८ ॥ व्याख्या–इहैकस्य कस्यचिनूनः कामिकं वैषयिकं सुखं बहु प्रनूतं दृश्यते, इतरस्य पुनर्नैतादृशमल्पमेवेत्यर्थः. ननु नोगसामग्र्या वृद्धिह्रासाभ्यां तस्यापि वृद्धिह्रासौ नविष्यत इत्याह–समाने नोगसंयोगे सदृश्यामपि धनवसनासनशयनन्नवनवनितावाद्यगेयगंधद्रव्यादिकायां यत एवं तत इह कामिकसुखस्य बहुत्वे स्तोकत्वे वान्वयव्यतिरेकाभ्यां धर्मं विना कोऽन्यो हेतुः? न कोऽपीति. अयं नावः–यदि नोगांगान्येव केवलं कामिकसुखंप्रति हेतवः स्युस्तदा तेषु तुल्येषु तदपि तुल्यमेवोपलभ्येत, न चोपलभ्यते त-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूर्त । इव धर्मः समाययौ ॥ १९ ॥ तस्मै प्रणमते दत्वा । धर्मलाभाशिषं गुरुः ॥ कृता मूतस-
रः स्नानै—रिव वर्णैरभाषत ॥ २० ॥ गंतुमीहामहे सार्थ—वाह साहायकात्तव ॥ वसं-
तपत्तनं मेघा । इव दूरं नभस्वतः ॥ २१ ॥ स प्रोचे भाग्यवानस्मि । यत्प्रयाणामुखे मम ॥
यूयं शकुनसर्वस्व—मिवायासिष्ट हक्पथं ॥ २२ ॥ एषां सपरिवाराणां । यदन्नाद्युपयुज्यते ॥
तत्संपाद्यं त्वयासर्व—मिति सूदं शशास सः ॥ २३ ॥ तावदाम्रफलैः पाक—पेशलैः परिपूरितं
॥ स्थालं कौशेलिकीचक्रे । कश्चित्तस्य नरः पुरः ॥ २४ ॥ तदेव स्थालमुध्धृत्य । फलैः कुर्वन्नि-
मंत्रणां ॥ प्रकृत्या दानशौंडीरो । न्यषेधि गुरुणा धनः ॥ २५ ॥ रसज्ञोल्लासिनी गन्ध—वासि-
नी तृड्विनाशिनी ॥ जगदानंदिनी साधु—माधुर्यधरितामृता ॥ २६ ॥ भवतामुचिता से-
यं । फलाली किं निषिध्यते ॥ हुं ज्ञातं कठिना भूरि—कषाया यदसौ हृदि ॥ २७ ॥ सो-
त्प्रासमिति जल्पाके । धने यतिपतिर्जगौ ॥ चारित्रे हि कृपा सौम्य । सारा तारेव लोचना
॥ २८ ॥ त्रिभिर्विशेषकं ॥ तद्दया जीवरक्षार्थं । न गृह्णंति मुमुक्षवः ॥ फलं सबीजमन्नं चा
—राद्धं जीवमये हिते ॥ २९ ॥ अहो सूक्ष्मेक्षिकामीषा—महो दुष्करकारिता ॥ शंसन्निति

For Private And Personal Use Only

मुदं मेडुरयामास । घृतधाराधरो धनः ॥ मुनिहंसेषु निध्यात्— नेत्रांनोजेषु चाद्भुतं ॥ ७५ ॥
वाग्दुग्धधारानेत्रांबु—धारा धारा घृतस्य च ॥ स्पर्धया वर्धयामासु—र्बोधिबीजं तदाशये ॥
॥ ७६ ॥ निवृत्तेऽस्मिन् व्रतिद्वंद्वे । क्षणं स्थित्वा विचक्षणः ॥ धर्मेप्सुः स ययौ रत्ना—र्थीव र-
त्नाकरं गुरुं ॥ ७७ ॥ प्रणम्य तमुपासीनं । दंतदीधितिदंनतः ॥ ऊचे बोधिसुधांनोधि—लहरीं
दर्शयन् गुरुः ॥७८॥ विरला एव संसारे । कांचिच्चिंतितार्थदं ॥ चिंतामणिमिवांनोधौ । लनं-
ते मानवं नवं ॥ ७९ ॥ दुःप्रापमपि मिथ्यात्व—निद्रामुद्रितदृष्टयः ॥ असाधितार्थमेवैतं ।
। हारयंत्यविवेकिनः ॥ ८० ॥ सम्यक्त्वांजनतः स्पष्ट— दृष्टयो ये तु जानते ॥ सम्यग्देवादित-
त्वानि । तेषामेष फलेग्रहिः ॥ ८१ ॥ देवोऽष्टादशनिर्दोषै-र्मुक्तोऽर्हन्नुच्यते जिनः ॥ कुदेवः
पुनरुत्सर्पि—कंदर्पदर्पकल्मषः ॥ ८२ ॥ महाव्रती निरारंनो । गुरुर्गौरवमर्हति ॥ परिग्रहग्रहव्य-
ग्र—मतिः कुगुरुरेव सः ॥ ८३ ॥ दयादमशमब्रह्म—निर्मलो धर्म उच्यते ॥ अधर्मस्तद्विपर्यासे—
ऽनासेव्यः स सतां पुनः ॥ ८४ ॥ इदं सम्यक्त्वकमलं । स्मेरं चेच्चित्तपल्वले ॥ श्रेयःकदंब-
कादंब—डंबरस्तत्र दूरगः ॥ ८५ ॥ इति सूरीशितुर्वाचा । जातसम्यक्त्वनिश्चयः ॥ धनः सु-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संतापितानंत—जंतुस्ते पाप्मजिर्गुरुः ॥ अंजोधितलमश्मेव । सप्तमं नरकं ययौ ॥ ६३ ॥ तत् श्रुत्वा नरकाज्जात—साध्वसः साधुसन्निधौ ॥ समं सुबुद्धिना पुत्रा—र्पितश्रीः सोऽजजद् व्रतं ॥ ६४ ॥ तौ मिथः सुहृदौ पूर्वं । जगतः सुहृदौ ततः ॥ तपस्यंतौ वपुष्मंतौ । प्रांते मोक्षमवापतां ॥ ६५ ॥ हरिश्चंद्रात्ततः स्वामिन् । सत्सु जैनेषु राजसु ॥ संख्यातीतेष्वतीतेषु । । त्वमजूः पृथिवीपतिः ॥ ६६ ॥ सुबुद्धेश्चान्वये मंत्रि—ष्वेव धर्माधिकारिषु ॥ असंख्येयेष्वतीतेषु । सोऽहं ते सेवकोऽजवं ॥ ६७ ॥ तदेष धर्मकथना—धिकारो नः क्रमागतः ॥ यदकांडेऽधुना तूचे । धर्मस्तत्कारणं शृणु ॥ ६८ ॥ अद्य सन्नंदनोद्यानं । चरिष्णुश्चारणौ मुनी ॥ अप्राक्षं जवतः स्वामि—न्नायुर्ज्ञाननिधी अहं ॥ ६९ ॥ ताज्यां जवदजोरायु—र्मासमेकमितीरिते ॥ अहमेव रयादेत्य । पूच्चकार पुरस्तव ॥ ७० ॥ स्वजर्तुर्व्यालवेताल—वैरिवह्निविषव्यथाः ॥ वीक्ष्यासन्नो विलंबेत । हंत यः सेवकः स कः ॥ ७१ ॥ क्षणं गीतात्क्षणं नृत्या—त्क्षणं तूर्याङ्गवेध्धृतिः ॥ धृतिः सदातनी यस्मा—द्धर्मः स्मर्यते न सः ॥ ७२ ॥ अथोवाच नृपः शोक—शंकुसंकुलिताशयः ॥ बंधो प्रमादनिद्रालुः । साध्वहं बोधितस्त्वया ॥ ७३ ॥ मम त्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शवं तदेतं संस्कार्य । पुनीत्तः स्वां पुरीं पुनः ॥ माजूदस्मदनालोक—शोकसंकुलिता प्रजा ॥ ॥ ७३ ॥ शवं तदग्निसात्कृत्वा । प्रापतुस्तौ निजां पुरीं ॥ शोकांधानां नृणां वामा—वामदृग्ला-जसन्निजौ ॥ ७४ ॥ सर्वतः कुर्वंति जन—व्राते नवनवोत्सवान् ॥ स्वां सजामेत्य तौ प्रीत्या । निविष्टावेकविष्टरे ॥ ७५ ॥ विष्णुना सह वाग्गोष्टीं । यावदारजते बलः ॥ तावन्न तं पुरोऽङ्गा-ङ्गी—दद्राक्षीच्च मनोहरीं ॥ ७६ ॥ मातः कुतस्त्वमत्रेति । नत्वोक्ता तेन सा जगौ ॥ न किं स्मरसि यद्वत्स । त्वया वावास्मि यंत्रिता ॥ ७७ ॥

तदा वत्साहमुत्साह—पूर्वं माहत्य संयमं ॥ प्राप्ता लांतकनाथत्वं । त्वां बोधयितुमागमं ॥ ७७ ॥ वने विनष्टेऽवरजे । विषादविषविह्वलः ॥ मायाविजीषणीजूय । मयैव त्वं प्रमोदितः ॥ ७ए ॥ तत्तस्य जूरिजूपाल—मौलिमौलीजवत्पदः ॥ विष्णोर्वीक्ष्य तथा मृत्युं । वत्स बुध्यस्व मा मुह ॥ ए० ॥ नामर्त्या मर्त्यलोकेऽस्मि—नशुचौ स्थातुमीशते ॥ यास्यामि तदहं वत्स । त्वं तु माजूः प्रमादजूः ॥ ए१ ॥ अथ तस्यामदृश्यायां । पुत्रविन्यस्तवैजवः ॥ रामो रामावचोवी-ची—निद्धोजः सोऽजजद्व्रतं ॥ ए२ ॥ पुण्यप्रजावादीशाने । विमाने श्रीप्रजाजिधे ॥ स देवो

For Private And Personal Use Only

उप-
चिंता०
७१

तस्य स्वादूक्तिपीयूष–सारणी धारिणी प्रि ।। ॥ आनशे मानसे नर्तुः । कलहंसीतुला यया ॥ ६१ ॥
जिषग्जीवो दिवश्च्युत्वा । वज्रनाजस्तयोः सुतः ॥ अनूचतुर्दशस्वप्न स्यातचक्रित्ववैजवः ॥ ६२ ॥
ते चानूवन्नृपामात्य–सार्थेशश्रेष्ठिनंदनाः ॥ तस्य कल्पद्रुमस्येव । पारिजातादयोऽनुजाः ॥६३॥
बाहुः सुबाहुः पं.ठोऽथ । महापीठ इति क्रमात् ॥ तेषां समानशीलानां । रूढिमानशिरेऽजिधा
॥६४ ॥ तेषामुपकलाचार्यं । कला अन्यस्यतां सतां ॥ स्पर्धयेव श्रियो जेजे । वाग्देवी वदनांबु
जं ॥६५॥ न्यस्य स्वतनये राज्यं । दानं सांवत्सरं ददौ ॥ लोकांतिकानां देवानां । विज्ञप्त्या स
नृपस्ततः ॥६६॥ यदा गृहीतचारित्रः । केवलज्ञानमापसः ॥ दीप्रं तदा तदाजास– मिव चक्रं
च नंदनः ॥ ६७ ॥ वज्रनाजोऽखिलांस्तेन । चक्रेणाक्रम्य जूजुजः ॥ आससाद स्थिरां धर्म—वि
जयी विजयश्रियं ॥ ६८ ॥ चतुर्निर्मंकलाधीशैः । सोदरैः सोदरैः सह ॥ देवेंद्र इव दिक्पालै–र
न्वजूनिस्तुषं सुखं ॥६९॥ दिवश्च्युत्वाजयघोषो । राजसूः सुयशा इति ॥ बजूव प्राग्जवस्नेहा–
च्चक्रिणोऽस्यैव सारथिः ॥ ७० ॥ अन्यदा विहरन् वज्र— सेनस्तीर्थंकृदाययौ ॥ अदूरे पुंकरी-
किण्या । नलिनीगुल्मकाननं ॥ ७१ ॥ तातं तीर्थंकरं नंतुं । वज्रनाजः सबांधवः ॥ समवसर-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तेने तदुपबृंहणं ॥ ७२ ॥ न समर्था भवंत्येके । सामर्थ्ये चालसाः परे ॥ धन्यौ बाहुसुबाहू
यौ । कर्मठौ गणकर्मणि ॥ ७३ ॥ ततः पीठमहापीठौ । दधतुः कलुषं मनः ॥ अपि सद्वृत्तपा-
लीकौ । प्रावृषीवांबुपल्वलौ ॥ ७४ ॥ यो दत्ते तं स्तुवन्नेष । गुरुर्लोकानुवर्तकः ॥ नोचेत्किम-
च्युताचारा—वपि नौ न प्रशंसति ॥ ७५ ॥ लोकैर्हि मेघा वर्षंतो । वर्षासु मलिना अपि ॥
स्तूयंते न त्वदातारः । शारदा विशदा अपि ॥ ७६ ॥ इत्यनालोच्य तौ माया—शल्यं मत्सरि-
णौ मुनी ॥ योषिज्जन्मफलं कर्म—दृढबंधं बबंधतुः ॥ ७७ ॥ अंते षडपि ते कालं । विधाया-
भिविवर्जिताः ॥ सर्वार्थसिद्धमानंचु—र्विमानं लक्षयोजनं ॥ ७८ ॥ इतश्च—अस्ति प्रत्यग्वि-
देहेषु । विजयाटोपराजिता ॥ पराजितामरापुरी—मदा पूरपराजिता ॥ ७९ ॥ भूमानीशान-
चंद्रोऽत्र । जन्ययात्रामुपेयुषा ॥ स्वीकृतासिलता येन । चित्रं सूता रणाग्रशः ॥ ८० ॥

तत्र चंदनदासोऽभू—दिभ्यः श्रीद इव श्रिया ॥ तस्य सागरचंद्राख्य—स्तनयो विनयोज्ज्वलः
॥ ८१ ॥ पूर्णेंदुवत्प्रसन्नास्यो । गंगाजलवदुज्ज्वलः ॥ स कस्य सिद्धविद्याया । भाजनन्नाभवत्प्रि-
यः ॥ ८२ ॥ इभ्येनाशोकदत्तेन । कठिनेन स्वभावतः ॥ बब्बुलेनेव रंभाद्रोः । सांगत्यं तस्य प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रये ॥ ९३ ॥ रहः स [illegible] पित्रा । विप्रत्रायिकया गिरा ॥ योऽयं वत्स वय [illegible] मे न जाति सुंदरः ॥ ९४ ॥ [illegible] बहिः शंखे—नेवांतः कुटिलात्मना ॥ आहते [illegible] पि । संख्या निद्धाकता नृणां [illegible] हीयंते मृदुला नूनं । संपर्के कर्कशात्मनां ॥ [illegible] ः कुशलं । मिलितस्योर्णया कि [illegible] ॥ ९६॥ न क्रूरा मृदुवाचोऽपि । कदाचन सुखाव [illegible] रंगजंगाय । गायन्नपि हि लुब्धकाः ॥९७॥ ददतोऽपि न तोषाया । प्रायो मुग्ध [illegible] मांसपेशीं ददानोऽपि । धीवरो हंति यत्तिमीन् ॥ ९८ ॥ सोऽप्यूचे तत्परास्तात । [illegible] खसाः ॥ तदुक्त्या मास्म शंकिष्ठाः । सुहृदं मे सदूषणं ॥ ९९ ॥ यादृक्तादृगसावस्तु । [illegible] या चिंतया मम ॥ रक्ष्यः स्वात्मैव दोषाब्धौ । मज्जंस्तेकैः प्रयत्नतः ॥ ४०० ॥ तातं [illegible] त्युक्त्वैवं । न स्वमित्रं मुमोच सः ॥ गत्यागत्यादिचेष्टासु । संबंधं पूर्वकर्मवत् ॥ १ ॥ अन्यदा सारशृंगारः । समं मित्रेण तेन सः ॥ वसंततौ वनं प्राप । रंतुं रतिपतिद्युतिः ॥ २ ॥ तदा च पूर्णज [illegible] दुहिता प्रियदर्शना ॥ पुष्पाण्यवचिनोतिस्म । तत्र सांद्रद्रुमांतरे ॥ ३ ॥ सा स्वर्ण [illegible] का—नंदिभिर्वंदिभिर्धृता ॥ त्रायतां कोऽपि मां वीरो—ऽधुनैवं तारमारटीत् ॥ ४ ॥ [illegible]

For Private And Personal Use Only

। त्वं स्वरूपं यतोऽसकौ ॥ अथ श्वो धनदेवस्य । वध्वा मंत्रयते रहः ॥ १६ ॥ क्रयविक्रयदि-
ग्यात्रा—राजसेवादिकर्मसु ॥ न मंत्र्यते नरैः स्त्रीभिः । सह सर्वोऽपि वेत्त्यदः ॥ १७ ॥ तन्म-
न्ये चिरदृष्टत्वा—ज्ज्ञातोऽयं त्वय्यरोचकी ॥ तां वल्लभयति प्रायो । दुःप्रापेऽर्थे नृणां स्पृहा ॥
॥ १८ ॥ स चेत्त्वां बाह्यवृत्त्यैव । रमयन् रमते तया ॥ जगदे तन्मां पतीकृत्य । भव त्वमपि
तादृशी ॥ १९ ॥ न स्वभर्तृसमाचारा । दूष्यंते हि कुलांगनाः ॥ पश्चादपीति जल्पंती । त्वं
न केनापि दंड्यसे ॥ २० ॥ श्रुत्वेति तद्वचः कर्ण—कटु सा रोषतोऽभ्यधात् ॥ निजां जिह्वा-
मसंभाल्य । किं रे वातुल जल्पसि ॥ २१ ॥ यद् दुःशील सुशीलेऽपि । दोषं वक्षि मम प्रिये
॥ तत्ते युक्तं यतो भ्रांतो । भ्रांतं विश्वमपीक्षते ॥ २२ ॥ तथाहि याहि वीक्षापि । पापहेतुः
सुहृद्द्रुहां ॥ इत्याक्रुष्टस्तया मंक्षु । स ध्वांक्ष इव निर्ययौ ॥ २३ ॥ विच्छायवदनो भ्राम्यन् । द-
दृशे सागरेण सः ॥ पृष्टो दुःखस्य हेतुं च । ससूत्कारमवोचत ॥ २४ ॥ कथ्यते कति दुःखस्य
। हेतवो भववासिनां ॥ शिवाफेत्कृतयः प्रेत—वनस्थायिनामिव ॥ २५ ॥ शिलाकांतेव
जिह्वा मे । जिह्वा यद्यपि जल्पितुं ॥ तथापि न हि किंचित्ते । गोप्यमस्तीति कथ्यते ॥२६॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नसमन्वितान् ॥ ४ ॥ मात्रा सह जिनं नीत्वा । चतुःशालेऽथ दक्षिणे ॥ सिंहासने निवेश्यैता
—स्तैलैरभ्यंजिषुर्वरैः ॥ ५ ॥ ततः प्राच्यचतुःशाल — सिंहासननिवेशितं ॥ ता एव स्नपया·
मासु—स्तद्द्वयं निर्मलैर्जलैः ॥ ६ ॥ ता औदीच्यचतुःशाल–सिंहासननिषादिनौ ॥ वस्त्रजूषण-
माल्यैस्तौ । परिचस्करिरे ततः ॥ ७ ॥ क्षणाच्च वैक्रिये वह्नौ । हिमवच्चंदनैर्हुतैः ॥ रक्षापो-
ट्टलिकां चक्रु—र्जगद्रक्षतयोस्तयोः ॥ ८ ॥ पर्वतायुर्नवेत्युक्त्वा । ताः प्रजुश्रवणांतिके ॥ आ-
स्फाल्य वज्रगोलौ तौ । शयनीये व्यमुंचतां ॥ ९ ॥ सौधर्माधिपतेस्ताव–त्सिंहासनमकंपत ॥
असासहीव नैश्चल्यं । जाते तीर्थेश्वरे हरेः ॥ १० ॥ क्षणं क्रुद्धोऽवधिज्ञानाद् । ज्ञातजन्मा जि·
नस्य सः ॥ क्रियासमभिहारेण । स्वं निनिंदापराधिनं ॥ ११ ॥ प्रणम्य स्वामिनं कर्तु—काम·
स्तज्जननोत्सवं ॥ वासवोऽवीवदद् घंटां । सुघोषां नैगमेषिणा ॥ १२ ॥ नेदुः सर्वविमानानां
। घंटा नादितया तया ॥ देवा अवदधुर्नादा— द्वैतात्केलिपरा अपि ॥ १३ ॥ घंटानादेऽल्प·
तां याति । क्रमेणाध्येतृघोषवत् ॥ ऊर्ध्वीकृत्य जुजामुच्चै–र्नैगमेषीत्यघोषयत् ॥ १४ ॥ जो जोः
शृणुत गीर्वाणा । मंदराद्रिं पुरंदरः ॥ जिनजन्मोत्सवं कर्तुं । गन्तान्वाह्वयतीह वः ॥ १५ ॥ के-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुमंगलादेव्या । युग्मरूपेण जग्मतुः ॥ ५ ॥ युग्मं ॥ चतुर्दशमहास्वप्न-सीहाख्यातमहोदयं ॥
समये जरतब्राह्मी-नामयुग्ममसूत सा ॥ ६ ॥ तौ सुबाहुमहापीठौ । सुनंदोदरमागतौ ॥ जा-
तौ ख्यातौ बाहुबली—सुंदरी चेति नामतः ॥ ७ ॥ पुनरेकोनपंचाश—द्युगलानि सुमंगला ॥
पुत्राणां सुषुवे जूरि । कन्या न ह्युत्तमाः स्त्रियः ॥ ८ ॥ कालेन कृपणीजूते-ष्वशेषेषु सुरडुषु
॥ विवृद्धगृद्धयः स्वैरा । वैरायन्तेस्म युग्मिनः ॥ ९ ॥ मानाद्विवदमानास्ते । नाजेयं न्यायमि-
च्छवः ॥ उपाययुः सरो नीरं । काम्यंतः पथिका इव ॥ १० ॥ धर्मतत्वं गुरुरिव । क्ष्मापतिर्दर्शि-
येन्नयः ॥ स तातस्तातदिष्टो वा । जवेत्तत्तं प्रयात जोः ॥ ११ ॥ इत्युक्ताः प्रजुणा नाजिं । प्रा-
हास्तेनापि वः प्रजुः ॥ अथो ऋषज एव स्ता-दित्युक्तास्तं पुनर्ययुः ॥ १२ ॥ उच्चासनाजिषेका-
ज्यां । राजा स्यादिति तद्गिरा ॥ उच्चजूमौ निवेश्यैनं । जग्मुस्ते वारिणे सरः ॥ १३ ॥ आस-
नाकंपविज्ञाता—वसरः सुरनायकः ॥ प्रजो राज्याजिषेकाय । विमायस्तूर्णमाययौ ॥ १४ ॥
सुधर्मामिव सौधर्मा-धिपतिर्विदधे सजां ॥ तदंतश्च चतुःशालं । रत्नसिंहासनान्वितं ॥ १५ ॥
निवेश्य तत्र तीर्थांब—धाराजिरजिषिच्य तं ॥ रुजुक्षा जूषयामास । दिव्यांशुकविजूषणैः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १६ ॥ पयः पयोजिनीपत्र—पुटैरादाय युग्मिनः ॥ तत्रागता निरैक्षंत । परावृत्तमिव प्रभुं ॥
॥ १७ ॥ निर्विवेकोऽभिषेकोऽस्य । मूर्ध्न्यलंकारशालिनः ॥ नीरं नीरंध्रधाराभि-रिति ते चि-
क्षिपुः पदोः ॥ १८ ॥ अहो विनीततामीषा—मिति जल्पन् पुरंदरः ॥ विनीतां नाम नीति-
ज्ञो । नगरीं तत्र निर्ममे ॥ १९ ॥ द्वादशयोजनायामां । नवयोजनविस्तृतां ॥ अयोध्यापरप-
र्यायां । धनदोऽपूरितां धनैः ॥ २० ॥ जन्मतः परिपूर्णासु । पूर्वलक्षासु विंशतौ ॥ बभूव भ-
रतक्षेत्रे । नाभेयः प्रथमो नृपः ॥ २१ ॥ गजोक्षाश्वनरादींश्च । चतुरंगां चमूं च सः ॥ संगृह्य
मंत्रिसामंता-रक्षादीनप्यतिष्ठिपत् ॥ २२ ॥ कल्पद्रुमाणां कार्पण्या-त्कंदमूलाद्यभुंजत ॥ अ-
कृष्टपच्यान् शालींश्च । युग्मिनः पशुवत्क्षुधा ॥ २३ ॥ तदजीर्णं बोधितस्तै । रौषधीनामुपा-
दिशत् ॥ मर्दनं स्तेमनं पत्र—पुटादिस्वेदनं जिनः ॥ २४ ॥ कालेनातिस्निग्धरुक्षे । वंशघर्षो-
नेऽनलः ॥ तदोत्पेदे विरोधो वाक्—कलेरिव कुटुंबके ॥ २५ ॥ क्षिपंतो वीक्ष्य ते दीप्ति-
मंतं रत्नधिया करं ॥ बाला इव भृशं मुग्धा । दग्धा युगलिनो जनाः ॥ २६ ॥ तस्य दाहाप-
राधं तै—र्विज्ञप्तः प्रभुरुचिवान् ॥ नो अयं वह्निरस्मिंश्च । प्रक्षिप्य पचतौषधीः ॥ २७ ॥ तै-

For Private And Personal Use Only

ष्टौ च सोऽन्वहं ॥ दत्वाद्युपचिराज्यस्त—मर्थिनामर्थनाग्रतं ॥ ६१ ॥ वस्त्रेनाश्वादिदानस्य ।
तस्य संख्यां करोतु कः ॥ वर्षतः पुष्करावर्त—स्यांनोबिंदून् मिमीत कः ॥ ६२ ॥ विज्ञाया-
वधिना दीक्षा-वसरं त्रिदशेश्वराः ॥ तत्रावतेरुराकृष्टा । इव तद्भाग्यरज्जुभिः ॥ ६३ ॥ कृत-
षष्टतपाः स्वामी । क्लृप्तस्नानादिमंगलः ॥ चैत्राष्टम्यां शितौ चंद्रे । चोत्तराषाढयान्विते ॥६४॥
स दिव्याजरणो दत्ता-वष्टंजो जृंजविद्धिषा ॥ शिबिकां सिद्धिसोपान—मिवारोहत्सुदर्शनां ॥
॥ ६५ ॥ युग्मं ॥ कादंबिनीव पवनैः । प्रजांजोजरवर्षिणी ॥ शिबिका मनुजैः पूर्वं । ततो देवै-
रवाहिता ॥ ६६ ॥ उपर्युपरि तिष्टद्भिः । प्रजूतोद्भूतकौतुकैः ॥ जुवो मर्त्यैर्दिवोऽमरैर्—रुंधन्
विपुलतामदं ॥ ६७ ॥ द्वक्सुधाकुल्ययालोक-वल्ली पल्लवयन्निव ॥ दिव्यातोद्यस्वनै र्णां । मोह-
निद्रां हरन्निव ॥ ६८ ॥ अप्सरोविसरोन्नीत-गीतसंगीतकोत्सवः ॥ सिद्धार्थं प्राप सिद्धार्थी-
जविष्यन्निव काननं ॥६९॥ त्रिजिर्विशेषकं ॥ समुत्तीर्य ततो याप्य-यानान्मानादिवांगिनः ॥
अशोको जगवांस्तस्था-वशोकस्य तरोस्तले ॥ ७० ॥ जारमालफलैरेजिः । किं शीलालंकृतस्य मे
॥ इतीव सर्वालंकारान् । विकारानिव सोऽमुचत् ॥ ७१ ॥ स्वर्णाब्जे नृंगमालेव । कांताकुंतल-

श्रु–पूरछूरितदृग्मला ॥ आससाद प्रसादं सा । शारदीव शशिप्रना ॥ ६ ॥ अथारोप्य गज-
स्कंधं । महीनाथः पितामहीं ॥ प्रतस्थे प्रनुमानंतु—मनंतज्ञानशालिनं ॥ ७ ॥ आसन्नीनूत-
समव–सरणस्तां जगाद सः ॥ पुरतः परमैश्वर्यं । मातस्तातस्य दृश्यतां ॥ ८ ॥ रूप्यकांचनमा-
णिक्य—मयं वप्रत्रयं व्यधुः ॥ तव सूनोरवस्थातुं । देवाः सेवागता इदं ॥ ९ । नंतुं तवां-
गजन्मान—मागछद्भिः सुरासुरैः ॥ एनिर्नजोऽपि संकीर्ण—मिव पश्य विधीयते ॥ १० ॥ च-
लाचलांचलः शक्र—ध्वजः सूनोः पुरस्तव ॥ दूरायातजनव्रात—धर्मघातं तनोत्ययं ॥ ११ ॥
व्योमाध्वनि ध्वनन्नेष । दुंडुनिस्त्वत्सुताग्रतः ॥ अमानैः स्वप्रतिध्वानै–र्मुखरीकुरुते दिशः ॥
॥ १२ ॥ सूनोस्तदेतदैश्वर्यं । पश्यंती विस्मयाकुला ॥ प्रनस्यदपि नाबुद्ध । जरती सा निजं म-
नः ॥ १३ ॥ स्वादयंती चिदानंद—मात्मानुनवगोचरं ॥ ढौकितं तनयेनेव । केवलज्ञानमाप
सा ॥ १४ ॥ तदैव परिपूर्णायु–र्ययौ सा शिवपत्तनं ॥ वत्सं विवत्सुं विज्ञाय । तत्र सोधुमि-
वालयं ॥ १५ ॥ तस्या अत्रावसर्पिण्यां । प्राक्सिद्धस्य वपुः सुरैः ॥ चंदनादिनिरभ्यर्च्य । न्य-
धायि क्षीरसागरे ॥ १६ ॥ नरतस्तापवर्षाभ्या–मिव प्रौष्ठपदो दिनः ॥ व्याप्तो विषादहर्षा-

भव ॥ स्वीकृत्य विदधे चक्री । तेषामष्टाह्निकामहं ॥ ५२ ॥ चलितोऽथ चलप्रोथ-सहर्षहय-
हेषितैः ॥ चित्कारै रथचक्राणां । गजेंद्राणां च गर्जितैः ॥ ५३ ॥ नादैर्मंगलतूर्याणां । लोकानां
तुमुलैरपि ॥ विश्वं शब्दमयं तन्वं-श्चक्री निजपुरीं गतः ॥ ५४ ॥ प्रतिप्रयाणमासन्नां । व्रजं-
तीमपि तां नृपः ॥ दूराद्दूरतरं यांती-मिवौत्सुक्यादमन्यत ॥ ५५ ॥ नृत्यध्ध्वजभुजा प्रीति-
विकाशिविशिखामुखा ॥ दृष्टमात्रास्य मातेव । सा पुरापूरयन्मुदं ॥ ५६ ॥ विहितारात्रिको
मंचा-ग्रस्थैर्वारिवधूजनैः ॥ प्रतीष्टमंगलोऽगार-द्वारस्थकुलयोषिता ॥ ५७ ॥ वंद्यमानपदः प्री-
ति-गौरैः पौरैः पदे पदे ॥ कुशलप्रश्नतस्तेषु । किरन्निव सुधारसं ॥ ५८ ॥ त्यक्त्वा द्वात्रिंश-
तं छत्र-सहस्रानेकमेव तत् ॥ धारयन्नात्मनो मूर्ध्नि । विनीतां विशतिस्म सः ॥ ५९॥ त्रिभि-
र्विशेषकं ॥ तत्प्रवेशे द्रुमा आसन् । अध्वजा अपि सध्वजाः ॥ प्रत्योकः स्वस्तिकैर्बद्धा । अ-
पि मुक्ता विराजिरे ॥ ६० ॥ प्राप्तः स्वभवनं वेत्रि-दत्तहस्तावलंबनः ॥ द्विपादुत्तीर्य सदसि ।
प्राङ्मुखो निषसाद सः ॥ ६१ ॥ बंधूनिव विवाहांते । विसृज्यामरखेचरान् ॥ सेनान्यादीन्
यथास्थानं । प्रजिघाय नृनायकः ॥ ६२ ॥ कुर्वाणः परिवारस्य । चिंतां चक्री चिरागतः ॥

यसी तु विडंबना ॥ तद्राज्यं त्यज्यतां बह्व—पायं श्वानन्यवायवत् ॥ ७४ ॥ यदनुज्यत स- र्वार्थ—विमाने निस्तुषं सुखं ॥ वत्सा विस्मृतिशीलास्त—त्संप्रति स्मर्यते न किं ॥ ७५ ॥ या चांबुसिंधुपाथोधि—पानेनापि न निष्ठिता ॥ किं सा शाम्यति दर्जाग्र-जाग्रज्जलकणैस्तृषा ॥ ॥ ७६ ॥ एवं देवनवाज्यस्त—नोगान्नोगान्न निष्ठिता ॥ आकांक्षा नेष्यते नोगै—र्मानवैस्तान- वं न वः ॥ ७७ ॥ इत्थं प्रबोध्य निःशेषान् । दीक्षयामास तान् प्रनुः ॥ तत् श्रुत्वा नरतस्ते- षां । मंक्षु राज्यानि जग्रसे ॥ ७८ ॥ तथाप्यायुधशालाया—श्चक्ररत्नं बहिश्चरे ॥ चरेन्यो ज्ञा- तवृत्तांतः । सचिवः प्रोचिवान्नृपं ॥ ७९ ॥ नानुजस्ते जगन्मान्या—माज्ञामद्यापि मन्यते ॥ ब- हलीमंमले बाहु—बली बाहुबलोर्जितः ॥ ८० ॥ अजिते तत्र डुर्जेये । किं जितं नवता प्रनो ॥ अकृते ग्रंथिनेदे हि । किं भिन्नं मोहकर्मणः ॥ ८१ ॥ एकोऽपि सहसहोजा । दारुणे रण- सागरे ॥ ग्रसते नूनुजां कोटी—स्तिमीनिव तिमिंगलः ॥ ८२ ॥ यावत्तव न वश्यः स्या—दसौ स्फुरदसौहृदः ॥ तावदायात्यदश्चक्र—मायुधावसथं कथं ॥ ८३ ॥ तत्पूर्वं तन्मुखच्छाया । दूतं प्रेक्ष्य निरीक्ष्यतां ॥ दूतेनामंत्रितोऽन्येति । स चेत्त्वां तज्जितं जितं ॥ ८४ ॥

रतेशितुः ॥ यः प्राप्तप्राज्यसाम्राज्यो–ऽप्यमुना विग्रहिष्यति ॥ ७६ ॥ भिक्तानमात्यमिषतो । द्वि-षतः पारिपार्श्वकान् ॥ यैर्व्यालिचालनामेवं । कुर्वन्नयमुपेक्षितः ॥ ७३ ॥ इत्यंतश्चिंतयन् वर्त्म । सुवेगोऽतीत्य वेगतः ॥ विनीतामेत्य नत्वा च । जरतेशं व्यजिज्ञपत् ॥ ७४ ॥ स्वामिन्न मनुजः किंतु । दनुजः स तवानुजः ॥ त्रपते नृपते ह्येष । भ्रातृजावादपि त्वयि ॥ ७५॥ न साम्ना न खरोक्त्या च । तव सेवां स मन्यते ॥ किं वज्रं शक्यते जेत्तुं । वारिणा वह्निनापि वा ॥ ७६ ॥ इयताप्यस्य सौभ्रात्रं । यद्राज्यं नाछिनत्ति ते ॥ व्यघास्य तद्धि साहाय्यं । यत्स्थानस्थोऽवति-ष्टते ॥ ७७ ॥ सहेत प्रहारं सिंहः । पादक्षोजं च पावकः ॥ न पुनः परतंत्रत्वं । तव क्ष्माधव बांधवः ॥ ७० ॥ तव दिग्विजयं श्रुत्वा । सेनान्यस्यास्य विक्रमं ॥ दृशौ विकूणिते कृत्वा । स-जायां हसतिस्म सः ॥ ७९ ॥ कुमारास्तस्य ये संति । सामंता वा समंततः ॥ तच्चित्तमनुवर्त-ते । तेऽपि वायुमिवाग्नयः ॥ ७० ॥ मम चक्रिजयेऽन्येन । न जाव्यं संविजागिना ॥ इति त-स्य जुजाध्माताः । प्राहुरेकैकशो जटाः ॥ ७१ ॥ धुरं दधाति वीराणां । तस्य पिंकोलिजोऽप्य-पि ॥ मन्ये वीरसुवस्तत्र । देशे सर्वा अपि स्त्रियः ॥ ७२ ॥ आस्तामाज्ञा न नामापि । तव त-

उप-
चता०
१३६

त्र प्रवर्तते ॥ जुवं प्राप्त इव स्वर्गः । स देशः प्रतिनाति मे ॥ ८३ ॥ स सम्राट् त्वं च राजासि ।
स स्वामी त्वं च सेवकः ॥ स ज्येष्ठस्त्वं कनिष्ठोऽसी–त्यूह्यते वीक्ष्य तं मया ॥ ८४॥ बंधोरौकृत्य-
माकर्ण्य । सुवेगस्य मुखादिति ॥ वहन् हर्षमहर्षं च । युगपन्नृपतिर्जगौ ॥ ८५ ॥ वयमग्रेऽपि
जानीमो । यन्नाहूत उपेत्यसौ ॥ संति सर्वे गुणा अस्मि–न्नेकं तु विनयं विना ॥ ८६ ॥ प्रावृड्
विपंका सुरभि । स्वर्णं कस्तूरिकोज्ज्वला ॥ अयं च सुविनीतः स्या—त्तत्प्राप्यं किमतः परं
॥ ८७ ॥ एकतो गोत्रकलहो । दुर्यशोद्गमदोहदः ॥ अन्यतो मन्यते नाज्ञा–मनुजेऽपीति हा-
स्यकृत् ॥ ८८ ॥ इतो व्याघ्रो दुरुटीत । इतोंधुः पन्नगस्त्वितः ॥ इतो रक्षो दवश्चेतः । संकटे
पतितोऽस्म्यहं ॥ ८९ ॥ स जीवतु चिरं तस्य । सहिष्यामोऽखिलं वयं ॥ स चेद्बलाधिकस्तर्हि
। मम प्रत्युत गौरवं ॥ ९० ॥ यद्ययोग्यमिदं जाति । तत्सभ्या वारयंतु मां ॥ सभ्या हि नृप-
पाथोधा—वुद्वेले सीमनूमयः ॥ ९१ ॥ अथाभ्यधत्त सेनानीः । मर्मविद्ध इवाकुलः ॥ देव ह्री-
रर्थिन इव । क्षमा क्षत्रस्य नोचिता ॥ ९२ ॥ चेद्वीतरागजातत्वा–त्तवाभूदीदृशी क्षमा ॥ त-
दाद्वात्रिंशतं नृप—सहस्राण्यग्रहीः किमु ॥ ९३ ॥ निगृह्याल्पबलान् नृपा—नस्मिन् बाहुब-

उप- लौ कृता ॥ क्षमा देव तव क्लीव—नाव एव निमंक्ष्यति ॥ ए४ ॥ अस्तमेति यतस्तेजः । स
चिंता० क्षत्राणां पुरो रिपुः ॥ यत्तस्मिन्नपि सौभ्रात्रं । सा नस्मनि घृताहुतिः ॥ ए५ ॥ राज्ञां रीति-
रिति भ्राता । ह्यविनीतोऽनुशिष्यते ॥ तत्सज्जीनव मा मांद्यी—रब्धिमुत्तीर्य गोष्पदे ॥ ए६ ॥
१३७ अश्वेनशिक्षणायासः । सादिनां च निषादिनां ॥ साफल्यं नजतादद्य । योधानां च परिश्रमः
॥ ए७ ॥ मंत्रिणोऽप्यन्ववर्तंते । वाणीं सेनापतेरिमां ॥ सानुमंत इव द्वेकां सिंहस्य प्रतिशब्दि-
तैः ॥ ए८ ॥ प्रयाणनेरीं नरता—धिनाथोऽवीवदत्ततः ॥ आहूता इव तध्ध्वानै—र्मिमिलुः को-
टिशो नटाः ॥ एए ॥ ग्राहैरिव गजैर्लोलैः । कल्लोलैरिव वाजिनिः ॥ कूर्मैरिव रथैर्नक्रै—रिव
शौर्योत्कटैर्नटैः ॥ ११०० ॥ फेनैरिव सितछत्रै—र्मुक्तैर्मुक्तैरिव ॥ प्रतस्थे नरतो नीष्म—क-
ल्पांत इव वारिधिः ॥ १ ॥ चिरात्समागतश्चक्री । पुनः क चलितोऽधुना ॥ विद्मो दिशानुसा-
रेण । वहलीमंकलंप्रति ॥ २ ॥ केसरीव वने तत्र । नास्ति बाहुबली स किं ॥ तमेव जेतुका-
मोऽसौ । स ह्यजय्यः सुरैरपि ॥ ३ ॥ चक्रस्यास्य बलं नूयो । गोत्रे न प्रनवत्यदः ॥ हारयि-
ष्यति तन्नूनं । नोच्यते राजविप्रियं ॥ ४ ॥ प्रतिग्रामं प्रजालापं । शृण्वन्नेवं सविस्मयं ॥ म-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्थुर्दिवि दिवौकसः ॥ मध्यस्थाः साक्षिण इव । कर्तुं तज्जयनिश्चयं ॥ ५० ॥ विश्रमय्य धनुर्दंडान् । क्षिप्त्वा कोशेष्वसीनपि ॥ शपंतस्त्रिदशानस्थु—र्दूरे सैन्यद्वयीजटाः ॥ ५१ ॥ वीराणां चिरसंप्राप्त—रणरंगोत्सवच्छिदे ॥ केनामी निर्मिता देवा । वेधसा मंदमेधसा ॥ ५२ ॥ गजाश्वशिक्षाशस्त्रास्त्र—संग्रहप्रमुखोऽखिलः ॥ दुर्जगायौवनमिवा-रंजोऽस्माकं वृथाजवत् ॥ ॥ ५३ ॥ आयातं रणपर्वेह । को मुंचति सचेतनः ॥ परं किं कुर्महे देवा । देवस्याज्ञा बलीयसी ॥ ५४ ॥ जटेषु प्रलपत्स्वेवं । मुष्टेष्विव हतेष्विव ॥ उत्तेरतुरहंकारा—द्विवेजात्तौ महीपती ५५ उजावजिमुखं यांतौ । कल्पांत इव वारिधी ॥ वीक्ष्य क्षणं ययुर्देवा। आकंपं किं पुनः परे ॥ ५६ ॥ तौ प्राप्य खुरक्षिदेशं । तस्थतुः संमुखौ मिथः ॥ प्रथमं दृष्टियुद्धाय । निर्निमेषदृशौ चिरं ॥ ५७ ॥ तौ वीक्ष्य निर्निमेषाक्षौ । विबुधाः समसेरत ॥ किमस्माकं प्रजुश्चक्रे । द्वैरूप्यं कुतुकादिति ॥ ५८ ॥ अक्रमे सोढुमुष्णासो-रिव बाहुबलेर्मेहः ॥ बाष्पधारा अमुंचंतां । जरतस्याक्षिणी क्षणात् ॥ ५९ ॥ मारोदीर्भ्रातरद्यापि । वज्र न भ्रियसे मया ॥ इति बाहुबलौ जल्प—त्यहसन्नमरा अपि ॥ ६० ॥

For Private And Personal Use Only

ते ॥ त्रिदशास्तेनिरे लोल—लोलाः कोलाहलं दिवि ॥ ७२ ॥ अथापासरतां दूरं । शूरंमन्यावुजा-
वपि ॥ विशिष्टमुष्टियुध्धेन । युयुत्सू मौष्टिकाविव ॥ ७३ ॥ जरतेनाहतो मुष्ट्या । तमसा प-
स्पृशेऽनुजः ॥ जित्वा तमः क्षणेनासौ । तिग्मांशुरिव दिद्युते ॥ ७४ ॥ बभ्रन्नथाश्वयां मुष्टि—
मजिह्मासुः श्रियं निजां ॥ कृपणार्जकयोरासी-त्तृतीयो जरतानुजः ॥ ७५ ॥ तेन वज्रमयेनेव
। मुष्टिना मूर्ध्नि ताडितः ॥ डुःखविस्मारणसखीं । मूर्छनां जरतो ययौ ॥ ७६ ॥ मया किमेत-
दारेजे । निषिध्धेनापि नाकिनिः ॥ क्षत्रियाणां ह्यनर्थांतो । विग्रहस्य कदाग्रहः ॥ ७७ ॥ जी-
वत्विदानीं जरतो । विरतोऽस्मि रणादहं ॥ मृतश्चेत्तर्हि नौ नून-मेकैव जविता चिता ॥ ७८ ॥
ध्यायन्निति सनिर्वेदं । सौनंदेयोऽग्रजं निजं ॥ उपाचरत्स्वहस्तेन । वारिचंदनवीजनैः ॥ ७९ ॥
त्रिजिर्विशेषकं ॥ व्यावृत्तचेतने तस्मिन् । क्षणेनोद्घाटितेक्षणे ॥ भ्रातृहत्याकलंकाब्धे—रुत्ती-
र्णं स्वममंस्त सः ॥ ८० ॥ स्वस्य शुश्रूषकं पश्यन् । पुरतो जरतोऽनुजं ॥ ह्रणीयमाणो व्यमृश
—ज्जीवितान्मरणं वरं ॥ ८१ ॥ तस्मिन् नृशायितक्रोधे । दंडाहतजुजंगवत् ॥ दंडरत्नं दधा-
नेऽधा—दंडं श्रीबाहुबल्यपि ॥ ८२ ॥ दंडयुद्धार्थिनौ दंड—पाणी दंडधराविव ॥ अन्योन्यं वी-

उप· णीखिलमनोरथः ॥ जरतोऽपालयन्नीत्या । षट्खंडं क्षोणिमंडलं ॥ २७ ॥ अथ बाहुबलेस्तत्र ।
चिंता० कायोत्सर्गेण तस्थुषः ॥ आजगाम क्षुधाक्षाम—वामः शीतर्त्तुरर्तिदः ॥ २८ ॥ हैमन्यामपि या·
मिन्यां । न शीतार्त्तिं विवेद सः ॥ सदा सन्निहितध्यान—कृशानुः सानुनिश्चलः ॥ २ए ॥ त-
१४ए स्य शीतव्यथां हर्तु-मिवोष्णर्तुर्व्यजृंजत ॥ प्रदीप्तजानुजीत्येव । यत्राजुवन्निशाः दशाः ॥ ३० ॥
चिदानंदसुधास्पंद-मंदीकृततृषोदयः ॥ सुखं लूकाकुलं काल—मतिचक्राम सोऽखिलं ॥ ३१ ॥
तं तपस्विषु साम्राज्ये-ऽजिषेक्तुमिव वारिजिः ॥ गार्जिमंत्रान् गृणन् वर्षा-कालः प्राडुरजूदथ
॥ ३२ ॥ उद्भिन्नदर्नशूचीजिः । संददर्ज मुनेः पदौ ॥ अक्रमेव क्षमा स्वेन । सोढुं तद्विरह·
व्यथां ॥ ३३ ॥ ब्रेमुस्तं परितो वल्ल्यो । विलोलनवपल्लवाः ॥ प्रदक्षिणाकृणे रक्त-वसना
श्राविका इव ॥ ३४ ॥ नीरपूरप्लुतबीला— स्त्यक्तपंकिलजूतलाः ॥ उत्फणाः फणिनो मूर्ध्नि ।
तस्य तस्थुस्तरोरिव ॥ ३५ ॥ एवं धाराधरोध्धूता—धारानाराचवीचयः ॥ जिनाज्ञाविधृतछत्रं
। कंपयांचक्रिरे न तं ॥ ३६ ॥ आसन्नं तस्य कैवल्यं । ज्ञात्वा संवत्सरात्यये ॥ प्रदत्तवाचिके
ब्राह्मी—सुंदर्यौ प्रेषयद्विजुः ॥ ३७ ॥ साध्व्यौ तत्रागते जूत्या—विव ते केवलश्रियः ॥ सोब्रा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वि—चितासु त्रिदिवौकसः ॥ ८९ ॥ अमुंचंत मुखेनाग्नि—कुमारास्तत्र पावकं ॥ वैक्रियैर्वा-
युर्निर्वायु—कुमारास्तमदीपयन् ॥ ९० ॥ नारशः सुरजिद्रव्या—एयत्र निक्षिप्य निर्जराः ॥
सौरन्यमैद्धिधन्नग्ने—रपि प्रजुवपुस्पृशः ॥ ९१ ॥ तपःशुष्केऽग्निना दग्धे । सुखं तन्मांसशोणि-
ते ॥ आसिंचंत चिताः क्षीरो—दधिनीरेण नाकिना ॥ ९२ ॥ अधस्तां शक्रचमरा—वूर्ध्वधि-
स्तस्य दक्षिणां ॥ ईशानेंद्रबली वामां । दंष्ट्रामस्थीनि चामराः ॥ ९३ ॥ याचमानास्तदा देवै
—र्दत्तकुंडत्रयाग्नयः ॥ श्रावका अजवन् काले । ब्राह्मणा अग्निहोत्रकाः ॥ ९४ ॥ ते तं स्वामि-
चितावह्निं । गृहे नित्यमपूजयन् ॥ रक्षंतिस्म च निर्वातं । द्विजेष्वद्याप्यसौ विधिः ॥ ९५ ॥
चितास्थानत्रये कृत्वा । रत्नस्तूपत्रयं ययुः ॥ कृत्वा नंदीश्वरेऽष्टाह्न—महं स्वसद्म वासवाः ॥
॥ ९६ ॥ सजायां ते सुधर्मायां । वज्रगोलसमुद्गके ॥ न्यस्यार्हद्दंष्ट्रिका नित्यं । मंगलार्थमपूज-
यन् ॥ ९७ ॥ जरतः प्रजुनिर्वाण—स्थानासन्नं मणीमयं ॥ प्रासादं योजनव्यासं । त्रिगव्यूतो-
च्छ्रयं व्यधात् ॥ ९८ ॥ स तत्र स्थापयामास । चतुर्विंशतिमर्हतां ॥ स्वस्वप्रमाणवर्णांक—शालि-
नीः प्रतिमाः क्रमात् ॥ ९९ ॥ तत्रैव कारयामास । दिव्यरत्नशिलामयीः ॥ भ्रातॄणां नवनव-

For Private And Personal Use Only

